# shrIparashurAmatantram

# શ્રીપરશુરામતન્ત્રં મેરુતન્ત્રાન્તર્ગતમ્

## Document Information

Text title : parashurAmatantram merutantre

File name : parashurAmatantrammerutantre.itx

Category : vishhnu, dashAvatAra, vishnu

Location : doc_vishhnu

Proofread by : DPD

Latest update : June 4, 2016

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 22, 2022

*sanskritdocuments.org*

# શ્રીપરશુરામતન્ત્રં મેરુતન્ત્રાન્તર્ગતમ્

। અથ મેરુતન્ત્રોક્તં શ્રીપરશુરામતન્ત્રમ્ ।

અથાતઃ સમ્પ્રવક્ષ્યામિ રામમન્ત્રં સમાહૃતમ્ ।
આકલ્પમેક એવાયં જામદગ્ન્યો મહાબલઃ ॥ ૧॥

દુષ્ટક્ષત્રતમોધ્વંસી રેણુકોદ્ભૂતભાસ્કરઃ ।

મન્ત્રઃ
બ્રહ્મક્ષત્રાય વિદ્મહે ક્ષત્રિયાન્તાય ધીમહિ ।
તન્નો રામઃ પ્રચોદયાત્ ॥

ભારદ્વાજમુનિપ્રોક્તો ગાયત્રં છન્દ ઈરિતમ્ ॥ ૨॥

શ્રીમાન્પરશુરામોઽસ્ય દેવતા ભક્તવત્સલઃ ।
અષ્ટેષુ ત્ર્યક્ષિવેદાર્ણૈર્મનોઃ પ્રોક્તં ષડઙ્ગકમ્ ॥ ૩॥

નેત્રયોઃ કર્ણયોર્નાસાદ્વયે ચાધરયુગ્મકે ।
સ્તનયોર્ભુજયોઃ પાર્શ્વદ્વયેંઽઘ્ર્યોર્વિન્યસેત્પદમ્ ॥ ૪॥

આધારે હૃદયે મૂર્ધ્નિ ક્રમાત્પાદાન્પ્રવિન્યસેત્ ।
કે દૃશિ શ્રોત્રનાસાયાં કપોલે હનુવક્ત્રયોઃ ॥ ૫॥

કણ્ઠાંસબાહુહસ્તેષુ પાર્શ્વહૃત્પૃષ્ઠકોદરે ।
નાભિકટ્યોર્ગુદે લિઙ્ગે ઊર્વોર્વા જાનુજઙ્ઘયોઃ ॥ ૬॥

પાદે ચ વિન્યસેદ્વર્ણાન્તતો ધ્યાયેત્ત્રિધા તનુમ્ ।

સાત્વિકધ્યાનમ્ ।
સાત્ત્વિકે શ્વેતવર્ણં ચ ભસ્મોદ્ધૂલિતવિગ્રહમ્ ॥ ૭॥

કિરીટિનં કુણ્ડલિનં વરં સ્વક્ષવરાભયાન્ ।
કરૈર્દધાનં તરલં વિપ્રં ક્ષત્રવધોદ્યતમ્ ।
પીતામ્બરધરં કામરૂપં બાલાનિરીક્ષિતમ્ ॥ ૮॥

તામસધ્યાનમ્ ।
ધ્યાયેચ્ચ તામસં ક્ષત્રં રુધિરાક્તપરશ્વધમ્ ।
આરક્તનેત્રકર્ણસ્થબ્રહ્મસૂત્રં યમપ્રભમ્ ॥ ૯॥

રાજસધ્યાનમ્ ।
ધનુષ્ટઙ્કારનિર્ઘોષસન્ત્રસ્તભુવનત્રયમ્ ।
ચતુર્બાહું મુસલિનં રાજસં ક્રુદ્ધમેવ ચ ॥ ૧૦॥

વિનિયોગઃ
અસ્ય શ્રીપરશુરામમન્ત્રસ્ય ભરદ્વાજ ઋષિઃ ।
ભક્તવત્સલ શ્રીપરશુરામો દેવતા । ગાયત્રી છન્દઃ ।
શ્રીપરશુરામપ્રીત્યર્થં અભીષ્ઠસિદ્ધ્યર્થં જપે વિનિયોગઃ ॥

કરન્યાસઃ
બ્રહ્મક્ષત્રાય વિદ્મહે અઙ્ગુષ્ઠાભ્યાં નમઃ ।
તન્નો અનામિકાભ્યાં નમઃ ।
ક્ષત્રિયાન્તાય તર્જનીભ્યાં નમઃ ।
રામઃ કનિષ્ઠિકાભ્યાં નમઃ ।
ધીમહિ મધ્યમાભ્યાં નમઃ ।
પ્રચોદયાત્ કરતલકરપૃષ્ઠાભ્યાં નમઃ ॥

હૃદયાદિ ન્યાસઃ
બ્રહ્મક્ષત્રાય વિદ્મહે હૃદયાય નમઃ । તન્નો કવચાય હુમ્ ।
ક્ષત્રિયાન્તાય શિરસે સ્વાહા । રામઃ નેત્રત્રયાય વૌષટ્ ।
ધીમહિ શિખાયૈ વષટ્ । પ્રચોદયાત્ અસ્ત્રાય ફટ્ ॥

મન્ત્ર પદન્યાસઃ
બ્રહ્મક્ષત્રાય વિદ્મહે નેત્રયોઃ । તન્નો અધરયુગ્મકે ।
ક્ષત્રિયાન્તાય કર્ણયોઃ । રામઃ સ્તનયોઃ ભુજયોઃ ।
ધીમહિ નાસાદ્વયે । પ્રચોદયાત્ પાર્શ્વયુગ્મકે અઙ્ઘ્યોઃ ॥

મન્ત્ર વર્ણન્યાસઃ

બ્રં નમઃ મૂલાધારે ।
હ્મં નમઃ હૃદયે ।
ક્ષં નમઃ મૂર્ઘ્નિ ।

ત્રાં નમઃ નેત્રત્રય્યઓઃ । નેત્રત્રયેષુ
યં નમઃ કર્ણયોઃ ।
વિદ્ નમઃ નાસાયામ્ ।
મં નમઃ કપોલે ।
હેં નમઃ હનૌ ।
ક્ષં નમઃ વક્ત્રે ।
ત્રિં નમઃ કણ્ઠે ।
યાં નમઃ બાહ્વોઃ ।
ન્તાં નમઃ હસ્તયોઃ ।
યં નમઃ પાર્શ્વે ।
ધીં નમઃ હૃદયે ।
મં નમઃ પૃષ્ઠે ।
હિં નમઃ ઉદરે ।
તં નમઃ નાભૌ ।
ન્નોં નમઃ કરયોઃ ।
રાં નમઃ ગુદે ।
મઃ નમઃ લિઙ્ગે ।
પ્રં નમઃ ઊર્વોઃ ।
ચોં નમઃ જાન્વોઃ ।
દં નમઃ જઙ્ઘયોઃ ।
યાત્ નમઃ પાદયોઃ ॥

વૈષ્ણવે તુ યજેત્પીઠે દેવાગ્રાચ્ય ચતુર્દલે ।
જમદગ્નિં ચ કાલં ચ રેણુકાં કામમર્ચયેત્ ॥ ૧૧॥

તદ્દલેષુ ષડઙ્ગાનિ તદ્બાહ્યેઽષ્ટદલે યજેત્ ।
દિક્ષુ વેદાન્ વિદિક્પત્રેષૂપવેદાંસ્તતો યજેત્ ॥ ૧૨॥

તતશ્ચાષ્ટદલે પૂજ્યા વિબુદ્ધાશ્ચાવતારકાઃ ।
બ્રહ્માસ્ત્રં વૈષ્ણવાસ્ત્રં ચ રૌદ્રં વાયવ્યમેવ ચ ॥ ૧૩॥

આગ્નેયં ચૈવ નાગાસ્ત્રં મોહનં સ્તમ્ભનં તથા ।
ઐન્દ્રપાલિકમસ્ત્રં ચ મહાપાશુપતં તથા ॥ ૧૪॥

પૂજયેદ્દશપત્રેષુ દ્વાદશારે તતોઽર્ચયેત્ ।

કશ્યપં ચ ભરદ્વાજં વિશ્વામિત્રં ચ ગૌતમમ્ ॥ ૧૫॥

વશિષ્ઠં નારદં ચાત્રિં પુલસ્ત્યં પુલહં ક્રતુમ્ ।
યાજ્ઞવલ્ક્યં ભાર્ગવં ચ ષોડશારે તતો યજેત્ ॥ ૧૬॥

સંહિતાશ્ચ પુરાણાનિ મીમાંસા ન્યાયમેવ ચ ।
સાઙ્ખ્યં પાતઞ્જલં શિલ્પં વેદાઙ્ગાનિ ચ ષટ્ ક્રમાત્ ॥ ૧૭॥

સર્વાણ્યુપપુરાણાનિ ચેતિહાસપુરાણકમ્ ।
સ્મૃતીસ્તુ ભૂપુરાગ્રે ચ દિગીશાનાયુધાનિ ચ ॥ ૧૮॥

યન્ત્ર ધ્યાનમ્

Please consult a tantra practitioner or a guru/teacher
before using the yantra for worship.

બિન્દુમધ્યે શ્રીપરશુરામપૂજનમ્ ॥

શ્રીપરશુરામં ધ્યાયામિ, આવાહયામિ । પરશુરામાય નમઃ ।
આવાહનં સમર્પયામિ । પાદ્યં સમર્પયામિ । અર્ઘ્યં સમર્પયામિ ।
આચમનીયં સમર્પયામિ । મધુપર્કં સમર્પયામિ । સ્નાનં સમર્પયામિ ।
વસ્ત્રાલઙ્કારાન્ સમર્પયામિ । યજ્ઞોપવીતં સમર્પયામિ ।
ગન્ધાન્ ધારયામિ । નાનાપરિમલપત્રં પુષ્પં સમર્પયામિ ।
ધૂપમાઘ્રાપયામિ । દીપં દર્શયામિ ।
નૈવેદ્યં સમર્પયામિ । પાનીયં ઉત્તરાપોષણ, હસ્તપ્રક્ષાલનં,
પાદપ્રક્ષાલનં, આચમનીયં, તામ્બૂલં સમર્પયામિ ।
કર્પૂરનીરાજનં દર્શયામિ । મન્ત્રપુષ્પં સમર્પયામિ ।
પ્રદક્ષિણાનમસ્કારાન્ સમર્પયામિ । અનયા પૂજયા શ્રીપરશુરામઃ
સુપ્રસન્નો વરદો ભવતુ ॥

ચતુર્દલે ધ્યાનમન્ત્રાઃ ।
ૐ જામદગ્ન્યાય નમઃ । ૐ કાલાય નમઃ ।
ૐ રેણુકાયૈ નમઃ । ૐ કામાય નમઃ ॥

ષડ્દલે ધ્યાનમન્ત્રાઃ ।
ૐ હૃદયાય નમઃ । ૐ શિરસે સ્વાહા । ૐ શિખાયૈ વષટ્ ।
ૐ કવચાય હું । ૐ નેત્રત્રયાય વૌષટ્ । ૐ અસ્ત્રાય ફટ્ ॥

અષ્ટદલે બાહ્યદિશાયાં વેદપૂજન એવં ધ્યાનમ્ ।

ઋગ્વેદાય નમઃ । યજુર્વેદાય નમઃ ।
સામવેદાય નમઃ । અથર્વવેદાય નમઃ ।
આયુર્વેદાય નમઃ । ગાન્ધર્વવેદાય નમઃ ।
ધનુર્વેદાય નમઃ । સ્થાપત્યવેદાય નમઃ ॥

અષ્ટદલે વિષ્ણુ અવતારપૂજનં એવં ધ્યાનમ્ ।
ૐ મત્સ્યાય નમઃ । ૐ કચ્છપાય નમઃ । ૐ વરાહાય નમઃ ।
ૐ નૃસિંહાય નમઃ । ૐ વામનાય નમઃ । ૐ રામાય નમઃ ।
ૐ કૃષ્ણાય નમઃ । ૐ બુદ્ધાય નમઃ ॥

દશદલે અસ્ત્રપૂજનં એવં ધ્યાનમ્ ।
ૐ બ્રહ્માસ્ત્રાય નમઃ । ૐ વૈષ્ણવાસ્ત્રાય નમઃ ।
ૐ રુદ્રાસ્ત્રાય નમઃ । ૐ વાયવ્યાસ્ત્રાય નમઃ ।
ૐ આગ્નેયાસ્ત્રાય નમઃ । ૐ નાગાસ્ત્રાય નમઃ ।
ૐ મોહનાસ્ત્રાય નમઃ । ૐ સ્તમ્ભનાસ્ત્રાય નમઃ ।
ૐ ઐન્દ્રાસ્ત્રાય નમઃ । ૐ મહાપાશુપતાસ્ત્રાય નમઃ ॥

દ્વાદશદલે ઋષિપૂજનં એવં ધ્યાનમ્ ।
ૐ કશ્યપાય નમઃ । ૐ ભરદ્વાજાય નમઃ ।
ૐ વિશ્વામિત્રાય નમઃ । ૐ ગૌતમાય નમઃ ।
ૐ વશિષ્ઠાય નમઃ । ૐ નારદાય નમઃ । ૐ અત્રયે નમઃ ।
ૐ પુલસ્ત્યાય નમઃ । ૐ પુલહાય નમઃ । ૐ ક્રતવે નમઃ ।
ૐ યાજ્ઞવલ્ક્યાય નમઃ । ૐ ભાર્ગવાય નમઃ ॥

ષોડશદલે શાસ્ત્રપૂજનં એવં ધ્યાનમ્ ।
ૐ સંહિતાયૈ નમઃ । ૐ પુરાણાય નમઃ । ૐ મીમાંસાયૈ નમઃ ।
ૐ ન્યાયાય નમઃ । ૐ સાધ્યાય નમઃ । ૐ પાતઞ્જલાય નમઃ ।
ૐ શિલ્પાય નમઃ । ૐ શિક્ષાયૈ નમઃ । ૐ કલ્પાય નમઃ ।
ૐ વ્યાકરણાય નમઃ । ૐ છન્દસે નમઃ । ૐ નિરુક્તાય નમઃ ।
ૐ જ્યોતિષાય નમઃ । ૐ ઉપપુરાણાય નમઃ । ૐ ઇતિહાસાય નમઃ ।
ૐ સ્મૃતયે નમઃ ॥

ભૂપુરેષુ દશદિગ્પાલાદિપૂજનં એવં ધ્યાનમ્ ।
ૐ શં કુબેરાય નમઃ ।
ૐ મં યમાય નમઃ ।

ૐ લં ઇન્દ્રાય નમઃ ।

ૐ વં વરુણાય નમઃ ।

ૐ હં ઈશાનાય નમઃ ।

ૐ રં અગ્નયે નમઃ ।

ૐ યં વાયવે નમઃ ।

ૐ ક્ષં રાક્ષસાય નમઃ ।

ૐ હ્રીં બ્રહ્મણે નમઃ ।

ૐ ક્લીં વિષ્ણવે નમઃ ।

અષ્ટદિશાપૂજનં એવં ધ્યાનમ્

પૂર્વદિશાયાં ૐ ઇન્દ્રાય નમઃ ।

દક્ષિણપૂર્વદિશાયાં ૐ અગ્નયે નમઃ ।

દક્ષિણદિશાયાં ૐ યમાય નમઃ ।

દક્ષિણપશ્ચિમદિશાયાં ૐ નિરૃતયે નમઃ ।

પશ્ચિમદિશાયાં ૐ વરુણાય નમઃ ।

ઉત્તરપશ્ચિમ દિશાયાં ૐ વાયવે નમઃ ।

ઉત્તરદિશાયાં ૐ કુબેરાય નમઃ ।

ઉત્તરપૂર્વદિશાયાં ૐ ઈશાનાય નમઃ ।

ઈશાનપૂર્વદિશાયાં ૐ બ્રહ્મણે નમઃ ।

નૈરૃત્યપશ્ચિમદિશાયાં ૐ અનન્તાય નમઃ ॥

દશદિક્પાલ આયુધપૂજનં એવં મન્ત્રાઃ ।

ૐ વજ્રાય નમઃ । ૐ શક્તયે નમઃ । ૐ દણ્ડાય નમઃ ।

ૐ ખડ્ગાય નમઃ । ૐ પાશાય નમઃ । ૐ અઙ્કુશાય નમઃ ।

ૐ ગદાયૈ નમઃ । ૐ ત્રિશૂલાય નમઃ । ૐ પદ્માય નમઃ ।

ૐ ચક્રાય નમઃ ॥

વર્ણલક્ષં જપેન્મન્ત્રં સિતાદ્યધૃતપાયસૈઃ ।
હુનેદ્બ્રાહ્મણભોજ્યાન્તં કૃત્વા સિદ્ધો ભવેન્મનુઃ ॥ ૧૯॥

બ્રહ્મકર્મરતો નિત્યં ગાયત્રીજપતત્પરઃ ।
સ એવ જાયતે સિદ્ધો નાન્યવિપ્રઃ કદાચન ॥ ૨૦॥

ગાયત્ર્યા ઃપ્રથમં પાદં પૂર્વકૃત્વા જપેન્મનુમ્ ।
લક્ષં પ્રાગ્વદ્ધુનેદ્રામં સાત્ત્વિકં તત્ર ચિન્તયેત્ ॥ ૨૧॥

સન્તાનાર્થં વિવાહાર્થં કૃષ્યર્થં વર્ષણાય ચ ।
વિષયાર્થં ધનાર્થઞ્ચ વાક્સિદ્ધ્યર્થમુદાહૃતમ્ ॥ ૨૨॥

સહસ્રમયુતં લક્ષં પ્રયુતં કોટિમેવ ચ ।
સાધ્યકૃચ્છ્રેઽતિકૃચ્છ્રે ચ દૈવસાધ્યે ત્વસાધ્યકે ॥ ૨૩॥

કાર્યા જપસ્ય સઙ્ખ્યેયં ક્રમાજ્જ્ઞેયા દશાંશતઃ ।
હોમઃ સર્વત્ર વિજ્ઞેયઃ પ્રત્યવાયનિરાકૃતૌ ॥ ૨૪॥

તાવદેવ જપેદ્વિદ્વાન્ગાયત્રીજપતત્પરઃ ।
મનાગપિ ન કર્તવ્યો બ્રહ્મદ્વેષઃ કદાચન ॥ ૨૫॥

ગાયત્ર્યા મધ્યચરણયુક્તં મન્ત્રં જપેદ્ધુનેત્ ।
તિલૌદનાજ્યં રામં તુ રાજસં તત્ર ભાવયેત્ ॥ ૨૬॥

દેશગ્રામપુરાદીનાં બાલાનાં ચ ગવામપિ ।
રક્ષણં સ્યાન્મહામારી શીતલા શાન્તયે તથા ॥ ૨૭॥

ગાયત્ર્યન્તિમપાદેન યુક્તં મન્ત્રં જપેદ્ધ્રુવમ્ ।
હોમઃ સર્ષપતૈલાક્તૈસ્તામસં ચિન્તયેદ્વિભુમ્ ॥ ૨૮॥

સર્વશત્રુવિનાશઃ સ્યાદ્રોગાદીનાં તથા ક્ષયઃ ।
એવં કુર્યાદ્યમુદ્દિશ્ય તસ્ય નાશો ભવેદ્ધ્રુવમ્ ॥ ૨૯॥

વૈશાખે શુક્લપક્ષે ચ તૃતીયાયાં તુ વાર્ષિકી ।
ભવેદસ્ય મહાપૂજા તાં ભક્તઃ પ્રયતશ્ચરેત્ ॥ ૩૦॥

રામભક્તં દ્વિજં નત્વા સઙ્ગ્રામે યાતિ ચેન્નૃપઃ ।
અવશ્યં સ રિપૂઞ્જિત્વા કુશલી સ્વગૃહં વ્રજેત્ ॥ ૩૧॥

રામભક્તેન યો દત્તઃ પુસ્તકે લિખિતો મનુઃ ।
સ તુ સિદ્ધિપ્રદો જ્ઞેયો નાસ્તિ તસ્ય પુરસ્ક્રિયા ॥ ૩૨॥

યત્કિઞ્ચિત્પુસ્તકારૂઢં રામભક્તમુખોદ્ગતમ્ ।
યન્ત્રં મન્ત્રોઽથવા વિદ્યા તત્સિદ્ધં નાસ્તિ સંશયઃ ॥ ૩૩॥

જ્ઞાત્વા ષોડશસંસ્કારૈઃ સંસ્કૃતં ચાર્યવંશજમ્ ।
કુલદ્વયવિશુદ્ધં તુ રામમન્ત્રાધિકારિણમ્ ॥ ૩૪॥

ફિરઙ્ગા યવનાશ્ચીનાઃ ખુરાસાનાશ્ચ મ્લેચ્છજાઃ ।
રામભક્તં પ્રદૃષ્ટ્વૈવ ત્રસ્યન્તિ પ્રણમન્તિ ચ ॥ ૩૫॥

કૃત્વા તુ વાલુકામૂર્તિં શ્રીરામસ્યાર્ચયેદ્વને ।
શાન્તં શત્રુમદં કુર્યાત્કુસુમાનિ ચ વૈ હુનેત્ ॥ ૩૬॥

રાઙ્ગોડમુકસ્ય કટકં જુહોમીતિ તથા વદેત્ ।
સપ્તાહાર્વાક્ તસ્ય સૈન્યં નષ્ટં તાવન્મિતં ભવેત્ ॥ ૩૭॥

મહેન્દ્રાગ્રે ચ કાશ્યાં ચ યો જપેન્નિર્જને વને ।
વર્ષાદર્વાક્ તસ્ય રામઃ પ્રત્યક્ષો જાયતે ધ્રુવમ્ ॥ ૩૮॥

સોમવારે કાશિકાયાં ગયાયાં પિતૃપક્ષકે ।
પુષ્યાર્કે પૌર્ણમાસ્યાં ચ પ્રયાગે તુ મૃગે રવૌ ॥ ૩૯॥

ગોદાવર્યાં સિંહગેઽર્કે ગઙ્ગાદ્વારે ઘટસ્થિતે ।
સૂર્યગ્રહે કુરુક્ષેત્રે રામો ગચ્છતિ સર્વદા ॥ ૪૦॥

આદ્યો રામો જામદગ્ન્યઃ ક્ષત્રિયાણાં કુલાન્તકઃ ।
પરશ્વધધરો દાતા માતૃહા માતૃજીવકઃ ॥ ૪૧॥

સમુદ્રતીરનિલયો મહેશપાઠિતાખિલઃ ।
ગોત્રાણકૃદ્ગોપ્રદાતા વિપ્રક્ષત્રિયકર્મકૃત્ ॥ ૪૨॥

દ્વાદશૈતાનિ નામાનિ ત્રિસન્ધ્યં યઃ પઠેન્નરઃ ।
નાપમૃત્યું ન દારિદ્યં ન ચ વંશક્ષયો ભવેત્ ॥ ૪૩॥

શ્રીમત્પરશુરામસ્ય ગાયત્ર્યેષા મહાદ્ભુતા ।
રાજ્યકૃત્ કલિભૂપાનાં સર્વતન્ત્રેષુ ગોપિતા ॥ ૪૪॥

॥ ઇતિ શ્રીમેરુતન્ત્રે પરશુરામતન્ત્રં સમ્પૂર્ણમ્ ॥

Profread by DPD, PSA Easwaran

*shrIparashurAmatantram*

pdf was typeset on November 22, 2022

Please send corrections to *sanskrit@cheerful.com*